ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8 ]
Total No. of Printed Pages : 8 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 59 ]
Total No. of Questions : 59 ]
ಸಂಕೇತ ಸಂಖ್ಯೆ : **16-S**

**Code No. : 16-S**

**C**

**CCE PR**
**REVISED**

Question Paper Serial No. **11**

इतः कर्तयत

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : First Language — SANSKRIT
# प्रथम भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**(ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Repeater)**

ದಿನಾಂಕ : 22. 09. 2020 ] [ Date : 22. 09. 2020
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-45 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-45 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 125 ] [ Max. Marks : 125

***ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 59 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे नवपञ्चाशत् (59) वस्तुनिष्ठाः विषयनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

**TEAR HERE TO OPEN THE QUESTION PAPER**
**प्रश्नपत्रमुद्घाटयितुमत्र कर्तयत**

**Tear here**

I. **अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** 10 × 1 = 10

1. 'ओजः' अस्य समानार्थकपदम् इदं भवति ।

(A) कान्तिः (B) क्रान्तिः

(C) भ्रान्तिः (D) शान्तिः ।

2. 'भीरुः' अस्य विरुद्धार्थकपदम् इदं भवति ।

(A) सूरः (B) क्रूरः

(C) शूरः (D) पूरः ।

3. 'नायकः' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

(A) नायका (B) नायिका

(C) नायकी (D) नायिकी ।

4. 'गच्छन्ति' अत्र एषः लकारः वर्तते ।

(A) लृट् (B) लङ्

(C) लोट् (D) लट् ।

5. एषु व्याकरणशुद्धं वाक्यम् इदं भवति ।

(A) जलं विना मीनः न जीवति । (B) जलस्य विना मीनः न जीवति ।

(C) जलाय विना मीनः न जीवति । (D) जले विना मीनः न जीवति ।

6. कर्णः <u>युद्धार्थं</u> युद्धभूमिं गच्छति । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कुत्र (B) कदा

(C) कति (D) किमर्थम् ।

7. 'बालस्तत्र' अत्र एषः सन्धिः वर्तते ।

(A) वृद्धि सन्धिः (B) गुण सन्धिः

(C) विसर्ग सन्धिः (D) यण् सन्धिः ।

8. अन्यपदार्थप्रधानः एषः समासः भवति ।

(A) बहुव्रीहिः (B) अव्ययीभावः

(C) तत्पुरुषः (D) द्वन्द्वः ।

9. छात्राः अध्येतुं शालां गच्छन्ति । अत्र कृदन्तपदम् इदं भवति ।

(A) छात्राः (B) अध्येतुम्

(C) शालाम् (D) गच्छन्ति ।

10. कर्तरि प्रयोगे कर्तृपदस्य विभक्तिः एषा भवति ।

(A) तृतीया (B) द्वितीया

(C) प्रथमा (D) चतुर्थी ।

II. **चतुर्थं पदं लिखत ।** 5 × 1 = 5

11. सत्यव्रतस्य पिता – चारुदेवशास्त्री :: सत्यव्रतस्य माता – .........................।

12. पादरहितः पदसमुदायः – गद्यम् :: पादसहितः पदसमुदायः – ........................... ।

13. उपनिषदः – शताधिकाः सन्ति :: पुरुषार्थाः – ........................... ।

14. सुरुचेः पुत्रः – उत्तमः :: सुनीतेः पुत्रः – ........................... ।

15. क्रियाः सर्वाः – स्नानमूलाः :: प्रसन्नात्मेन्द्रियमनाः – ........................... ।

III. **एकवाक्येन उत्तरं लिखत ।** 8 × 1 = 8

16. धारानगरस्य सिन्धुलराजस्य पुत्रः कः ?

17. कैकेय्याः हृदयं का निर्ममन्थ ?

18. महाभारतयुद्धे शल्यः कस्य सारथिः आसीत् ?

19. भारतीयभावना निरन्तरं किं ददाति ?

20. पाल् व्रण्टन् महोदयस्य प्रश्नानाम् उत्तराणि कथं लब्धानि ?

21. दुःखितः ध्रुवः कस्याः समीपम् आजगाम ?

22. आत्मतत्त्वज्ञानेन कस्य प्राप्तिः भवति ?

23. केसरी कुत्र राज्यं पालयतिस्म ?

IV. **द्वित्रैः वाक्यैः उत्तरं लिखत ।** 7 × 2 = 14

24. दधीचिमहर्षेः आश्रमस्य तपोवनस्य वर्णनं कुरुत ।

25. चन्नम्मा प्रजाभिप्रायं स्वीकृत्य राजारामं किम् अब्रवीत् ?

26. आतोद्यं कति विधम् ? तानि कानि ?

27. आयुर्वेदस्य अभिप्रायेण आदित्यस्य नमस्कारेण किं किं जायते ?

28. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत ।

a) शल्यकर्णौ रथारोहणं कुरुतः ।

b) शक्रः महत्तरां भिक्षां याचते ।

29. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

30. भीष्मेण दैवपुरुषाकारयोः विषये किम् उक्तम् ?

V. **सूचनानुसारम् उत्तरं लिखत ।** 6 × 2 = 12

31. सन्धिं विभज्य नाम लिखत ।

a) गौरियम्

b) जगन्नाथः ।

32. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) प्रतिदिनम्

b) जनसेवा ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) नीलः कण्ठः यस्य सः =

b) धनं च धान्यं च तैलं च लवणं च =

33. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) सेवकः कार्यं कृत्वा गृहं गच्छति ।

b) नगरे शोभमानम् उपवनं भवति ।

34. प्रयोगपरिवर्तनं कुरुत ।

a) ते अङ्कान् लभन्ते ।

b) अहं जलं पिबामि ।

35. लकारपुरुषवचनानि लिखत ।

a) बभूव

b) आज्ञापयति ।

36. वाक्यदोषं परिहरत ।

a) भवन्तः सर्वे अत्र आगच्छत ।

b) शङ्करस्य अभिषेकः रोचते ।

VI. **संस्कृतभाषया अनुवादं कुरुत ।** 1 × 2 = 2

37. ಮಾನವನ ಜೀವನದಲ್ಲಿ ಪರೋಪಕಾರವು ಶ್ರೇಷ್ಠವಾದ ಗುಣವಾಗಿದೆ. ಪರೋಪಕಾರದಿಂದಲೇ ಪಶುಗಳು, ಕಲ್ಲುಗಳು ಮತ್ತು ಮರಗಳು ಜಗತ್ತಿನಲ್ಲಿ ಗೌರವವನ್ನು ಪಡೆಯುತ್ತವೆ.

Philanthropy is the highest virtue in human life, even animals, stones and trees get the highest regard in the world through their Philanthropy.

VII. **कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** 1 × 2 = 2

38. प्रभातसमये सूर्यः पूर्वस्यां दिशि उदेति । सूर्यस्य प्रकाशं विना अस्मिन् जगति जीवितुं न शक्यते ।

VIII. **यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** 5 × 3 = 15

39. "याचको भूत्वा अत्र अहम् आगतः ।"

क: पाठः ? कम् अवदत् ? याचकरूपेण कः आगतः ?

40. "संस्कृतेनैव संस्कृतिरपि सुरक्षिता ।"

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

41. "सहसा वह्निमाविश ।"

कः पाठः ? के अवदन् ? कम् अवदन् ?

**अथवा**

"मया भोजो रक्षितः ।"

कः पाठः ? कः वदति ? कं वदति ?

42. "प्रशास्त्यस्य केसरी नाम वै पिता ।"

कः पाठः ? कः अवदत् ? केसरी कस्य पिता ?

43. "भवतु अस्माकं महाराज्ञी अभयदायिनी ।"

कः पाठः ? के अवदन् ? महाराज्ञी का ?

IX. **कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** 3 × 3 = 9

44. भासः ।

45. डा० के०एस्० नागराजन् ।

46. कालिदासः ।

**अथवा**

बल्लालसेनः ।

X. **पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** 4 × 3 = 12

47. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।

48. ततो गिरौ पपातैष इन्द्रवज्राभिताडितः ।
पतमानस्य चैतस्य वामो हनुरभज्यत ।।

**अथवा**

यमेव दिवसं ह्येष ग्रहीतुं भास्करं प्लुतः ।
तमेव दिवसं राहुर्जिघृक्षति दिवाकरम् ।।

49. आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा ।
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ।।

50. यत्र कुत्र वा वयं समग्रभारते स्थिता
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।
आदितश्च मध्यतस्तथान्ततश्च भारता
भारतीय भावनेति वृद्धिमेतु भारते ।।

XI. **वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत ।** 1 × 3 = 3

51. सैन्धवमानय ।

**अथवा**

मुखं कमलम् इव सुन्दरम् ।

XII. **प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** 1 × 3 = 3

52. पुराणमित्येव न साधु सर्वम् ।

XIII. **पद्यं पूरयत ।** 1 × 4 = 4

53. सुखस्य दुःखस्य ..........................................................................
..........................................................................।
..........................................................................
........................................................................ हि लोकः ।।

XIV. **दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्गलभाषया वा लिखत ।** $3 \times 4 = 12$

54. भीष्मयुधिष्ठिरयोः संवादं पद्यानुगुणं सङ्गृह्य लिखत ।

55. वृक्षायुर्वेदग्रन्थे प्रतिपादितानां चतुर्विधवृक्षाणां विषये लिखत ।

**अथवा**

सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः ? विवृणुत ।

56. अमरनाथगुहा विषये का पुराणकथा अस्ति ?

XV. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** $1 \times 4 = 4$

57. संस्कृतसाहित्ये बहूनि काव्यानि विरचितानि सन्ति । तेषु महाभारतम् अन्यतमम् । इदं संस्कृतभाषायाः सर्वश्रेष्ठं, सुविशालं, सुन्दरं, महाकाव्यम् । महत्त्वात् भारवत्त्वात् च महाभारतम् इति उच्यते । अस्य विषये 'भारतं पञ्चमो वेदः' इति उक्तिः प्रसिद्धा वर्तते । अस्य कर्ता भगवान् वेदव्यासः ।

महाभारतं कौरवापाण्डवानां कथादृष्ट्या लौकिकं काव्यम् । अवतारपुरुषस्य श्रीकृष्णस्य महिमावर्णन दृष्ट्या अलौकिकं काव्यम् इति सुप्रसिद्धम् । महाभारते अनेकाः उपकथाः बहवः उपदेशाः च प्रसिद्धाः । तेषु अर्जुनं प्रति कृष्णोपदेशः अन्यतमः । सः उपदेशः भगवद्गीता इत्येव विख्यातः । भगवद्गीता हिन्दूनां पवित्रग्रन्थः वर्तते । महाभारते धर्मराजं प्रति भीष्मोपदेशः धृतराष्ट्रं प्रति विदुरोपदेशः च वर्तते ।

**प्रश्नाः**

i) महाभारतस्य कर्ता कः ?

ii) महाभारतस्य विषये का उक्तिः प्रसिद्धा वर्तते ?

iii) महाभारतं कौरवपाण्डवानां कथादृष्ट्या कीदृशं काव्यम् ?

iv) हिन्दूनां पवित्रग्रन्थः कः ?

XVI. **पत्रं लिखत ।** $1 \times 5 = 5$

58. मैसूरुमण्डलस्य सर्वकारीय विद्यालयस्य छात्रः/छात्रा इति मत्वा मातुलस्य विवाहार्थं दिनचतुष्टयं विरामं संप्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

शैक्षणिक प्रवासार्थं मद्रास् नगरं गन्तुं धनं प्रेषयितुं निवेद्य पितरं प्रति पत्रं लिखत ।

XVII. 59. **दशवाक्यैः प्रबन्धं लिखत ।** $1 \times 5 = 5$

परिसरविज्ञानम्

**अथवा**

दूरदर्शनम् ।